दिनाङ्क :- 22.06.2025 सायम् :- 06:20

**मुख्यवार्ता :-**

- **इरान्-देशः स्वस्य परमाणु-सौकर्येषु अमरिकीय-सैन्याक्रमणस्य निन्दां कुर्वन् उक्तवान् यत् अन्ताराष्ट्रियविध्याः संयुक्तराष्ट्रसङ्घस्य शासनपत्रस्य च गभीरोल्लङ्घनमस्तीति।**
- **अन्ताराष्ट्रिय-परमाणु-ऊर्जा-संस्था ईरान्-देशस्य आपत्कालीन-स्थितिं दृष्ट्वा श्वः आपत्कालीन-सभाम् आयोजयिष्यति; तेनोक्तञ्च यत् साम्प्रतं यावत् इरानस्य परमाणु-स्थलेषु कृताक्रमणैः विकिरणस्तरेषु वृद्धिः नाभवदिति।**
- प्रधानमन्त्री नरेन्द्रमोदी अद्य ईरान्-देशस्य राष्ट्रपतिना सह वार्तालापं कृत्वा इरान्-इजरायल-देशयोः मध्ये वर्तमानस्य द्वन्द्वस्य वृद्धौ गभीरां चिन्तां प्रकटितवान्।
- **केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य फोरेन्सिक्-विश्वविद्यालयस्य, सि. एफ्. एस्. एल्. इत्यस्य च शिलान्यासार्थं द्विदिवसीययात्रायाम् रायपुरे अस्ति।**
- **श्रीलङ्कादेशः नेपालदेशश्च आपरेशन् सिन्धु इत्यस्य अन्तर्गतं इरान्-देशात् स्वनागरिकाणां निष्कासने साहाय्यार्थं भारतसर्वकाराय धन्यवादं प्रायच्छताम्।**
- एण्डर्सन्-तेण्डुल्कर्-ट्रोफी-क्रीडायाः प्रथमायां स्पर्धायां आतिथेयः इङ्ग्लेण्ड्-देशः, तृतीयदिने प्रथम -पार्याः क्रीडायां भारतं विरुध्य पञ्चक्रीडकानां हानौ नवत्युत्तरद्विशतधावनाङ्कान् रचितवान्।

**इरानः "ट्रू-प्रोमिस्-3" इति घोषयति।**

इरान्-देशः, बेन्-गुरियोन्-विमानस्थानकं, जैविकसंशोधनकेन्द्राणि, कमांड्-कोरिट्रोल्-सौकर्याणि च लक्ष्यीकृत्य, आपरेशन्-"ट्रू-प्रोमिस्-3" इत्यस्य भागरूपेण अस्य वर्षस्य प्रारम्भे एव इजरायल-देशं विरुध्य स्वस्य सर्वाधिकं महत्त्वपूर्णं प्रक्षेपास्त्र-प्रहारं निष्पादयत्। इस्लामिक्-रिवोल्यूषनरी-गार्ड्-कार्प्स् इत्यनेन दृढीकृतं यत् सद्यः एव अमरिका इजरायल-देशयोः इरानी-भूभागे कृतानां वायु-आक्रमणानां प्रतिक्रियारूपेण आक्रमणानि प्रारब्धानीति, येन वर्तमानस्य पश्चिम-एशियायाः द्वन्द्वे आपत्कर-वृद्धिः अभवदिति।

**IAEA-US स्ट्राइक्स्:**

अन्ताराष्ट्रिय-परमाणु-ऊर्जा-संस्था इत्यस्य प्रमुखेन राफेल् ग्रोसी इत्यनेन प्रोक्तं, यत् ईरान्-देशस्य तात्कालिक-स्थितिं दृष्ट्वा अन्ताराष्ट्रिय-परमाणु-ऊर्जा-संस्था श्वः आपत्कालीनं सम्मेलनम् आयोजयिष्यति। अद्य सामाजिक-प्रसार-माध्यमे ग्रोसी इत्येषः अवदत् यत्, इरान्-देशस्य परमाणु-सौकर्येषु अमेरिकादेशस्य सैन्य-आक्रमणानन्तरं सः एजेन्सी-इत्यस्य बोर्ड्-आफ़्-गवर्नर्स् इत्यस्य आपत्कालीन-सभाम् आहूयते इति।

**प्रधानमन्त्री मोदी इरानप्रमुखः**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य ईरान्-देशस्य राष्ट्रपतिना मसूद् पेज़ेश्कियान् इत्यनेन सह वार्तालापं कृत्वा इरान्-इजरायल-देशयोः मध्ये सद्यः एव उद्भूतस्य उद्विग्नतायाः विषये गभीरा चिन्ता प्रकटिता। सामाजिक-प्रसार-माध्यमे, चर्चायां नेतारौ वर्तमान-स्थितिं विस्तरेण चर्चितवन्तौ। श्रीमोदी सामाजिक-प्रसारमाध्यमिकसन्देशे अकथयत् यत् क्षेत्रीयशान्तेः, सुरक्षायाः, स्थिरतायाः च शीघ्रतया स्थापनस्य मार्गः युद्धविराम एवास्तीति।

**नेपाल-श्रीलंका धन्यवाद**

नेपालश्रीलङ्कादेशाभ्यां भारताय आभारभावभरितभावा: सन्ति प्रेषिता:। ध्यातव्यमस्ति यत् ईरानदेशात् ऑपरेशनसिन्धु इत्यभियानमाध्यमेन भारतीयनागरिकैस्सह श्रीलङ्कानेपालयोरपि नागरिका: भारतीयदलेन सकुशलं प्रत्यानीता: आसन्।

**छत्तीसगढ़ अमित शाहः**

गृहमन्त्री अमितशाहः छत्तीसगढ़स्य द्विदिवसीय-यात्रायाम् रायपुरम् सम्प्राप्तोऽस्ति। यात्रावधौ सः राज्यस्य राजधान्यां रायपुर-नगरे, नारायणपुर-मण्डले च विभिन्नेषु कार्यक्रमेषु भागं गृहीतवान्। केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य रायपुरनगरे राष्ट्रिय-न्यायवैद्यकीय-विज्ञान-विश्वविद्यालयस्य, केन्द्रीय-न्यायवैद्यकीय-विज्ञान-प्रयोगशालायाः च परिसरस्य शिलान्यासं अकरोत्। अयं फौरेन्सिक्-विज्ञान-विश्वविद्यालयः प्रायः चतुश्शतकोटि-रूप्यकाणां व्ययेन प्रायः चतुर्विंशति-एकड इति क्षेत्रे निर्मितः भविष्यति। अत्रावसरे केन्द्रीय-गृह-मन्त्री अमितशाहः अवदत् यत् प्रसंस्कृत-समाजे हिंसायाः, रक्त-आतङ्कस्य च स्थानं नास्ति इति। सः अवदत् यत् सर्वकारः नक्सल्-मतस्य उन्मूलनं कर्तुं संकल्पं कृतवान् अस्ति, शीघ्रमेव तत् पूरयिष्यति च।

श्रीशाहः अद्य नया रायपुरनगरे सुरक्षाविषयकविषयेषु छत्तीसगढस्य तथा समीपस्थानां राज्यानां पुलिस-महानिदेशकैः, अतिरिक्त-पुलिस-महानिदेशकेश्च सह मेलनं करोति। अन्यस्मिन् सभायां केन्द्रीयः गृहमन्त्री वामपथोग्रवादात् सुरक्षायाः समीक्षामपि अकरोत्। श्वः केन्द्रीय-गृह-मन्त्री बस्तर्-विभागस्य नारायणपुर-मण्डलस्य अबुझमद्-क्षेत्रं गत्वा तत्र ग्रामवासिभिस्सह संवादं करिष्यति। एतदतिरिच्य, केन्द्रीय-गृह-मन्त्री नारायणपुर-मण्डलस्य इर्कभट्टी-क्षेत्रे स्थितस्य सीमा-सुरक्षा-बलस्य शिबिरम् अपि गत्वा भटैस्सह संवादं करिष्यति।

**एनआईए पहलगाम**

पहलगाम आक्रमणविषये राष्ट्रिय-न्यायाभिकरणेन महत्त्वपूर्णसफलता अधिगता। आततायिनां शरणदातृषु द्वौ अभिकरणेन निगडितौ।

**अमेरिका-आक्रमणम्-इरान्-देशस्य वक्तव्यम्-**

इरान्-देशः स्वस्य परमाणु-सौकर्येषु अमेरिकादेशस्य सैन्य-आक्रमणस्य दृढतया निन्दाम् अकरोत्। तेन उक्तञ्च यत् इदं अन्ताराष्ट्रियविध्याः संयुक्तराष्ट्रसङ्घस्य शासनपत्रस्य च गभीरोल्लङ्घनमस्तीति। इरान्-देशस्य विदेशमन्त्रालयः एतत् आक्रमणम् क्रूरतायाः कृत्यम् इति अमन्यत, तेन सञ्चेतितञ्च यत् परिणामानां कृते संयुक्तराज्यम् देशः एव पूर्णतया उत्तरदायी भविष्यतीति ।

**इरानस्य विदेश-मन्त्रालयः**

अमेरिकीयसैनिकाः इजरायल-देशेन सह समन्वयं कृत्वा, इरान्-देशस्य परमाणु-सांस्थानिक- स्थलेषु यथार्थ-सैन्य-प्रहारं कृतवन्तः इति कारणात्, इरान्-देशस्य विदेश-मन्त्री सैयद् अब्बास् अराघ्ची इत्येषः संयुक्तराज्यामेरिका-देशस्य निन्दाम् अकरोत्। एतत्पूर्वं, अद्य प्रातः राष्ट्रायकृत-सम्बोधने, श्रीट्रम्पः इरान्-देशस्य परमाणु-स्थलानामुपरि कृताक्रमणानि अद्भुतरूपेण सफलानि इति वर्णितवान्, उक्तवाञ्च यत् आक्रमणानां उद्देश्यं इरान्-देशस्य परमाणु-संवर्धन-क्षमतायाः निवारणं, विश्वस्य प्रथम आतङ्क-प्रायोजक-राष्ट्रस्य परमाणु-आपदायाः निवारणञ्च आसीदिति।

**नेतन्याहु-एस्ताडोस् यूनिडोस् आक्रमणम्**

इजरायल-देशस्य प्रधानमन्त्री बेञ्जामिन् नेतन्याहुः इरान्-देशस्य परमाणु-स्थापनानामुपरि कृताक्रमणस्य निर्णयाय राष्ट्रपतिं ट्रम्पं अभिनन्दयति। सः इरान्-देशस्योपरि कृताक्रमणस्य सचलचित्राङ्कनमपि प्रकाशितवान्। सः इतोऽपि अवदत् यत्, आपरेशन्-रैज़िङ्ग्-लयन् इत्यस्मिन् इजरायल-देशः यथार्थतया अद्भुतानि कार्याणि अकरोदिति।

**गु□स-नेतन्याहु – अमेरिकी प्रहारा:**

संयुक्तराष्ट्रसंघस्य महासचिव: एण्टोनियो गुटेरेस् इत्यनेन ईरान्-देशे अमेरिकी – आक्रमणं भयावहमस्तीति वर्णितम्। मध्यपूर्वे द्वन्द्व: शीघ्रमेव नियंत्रणात् बहि: गन्तुं शक्नोति इति संचेतनाम् स: अयच्छत्। सोशल मीडिया पोस्ट माध्यमेषु स: उक्तवान् यत् एतत् अन्ताराष्ट्रिय-शान्ति सुरक्षयो: प्रत्यक्ष: संकट: अस्ति। स: सदस्य-राज्येभ्य: आवाहनं कृतवान् यत् ते संयुक्त-राष्ट्रसंघस्य विधीनां अन्येषां नियमानाम् चान्तर्गतं स्वदायित्वं निर्वहन्तु इति। स: बोधितवान् यत्, वस्तुत: सैन्य-समाधानं नास्ति तथा च अग्रे गन्तुं एकमात्र: मार्ग: कूटनीति: एव अस्ति।

**क्रिके□निकषस्पर्धा**

एण्डर्सन्-तेण्डुल्कर्-ट्रोफी-क्रीडायाः प्रथमायां स्पर्धायां आतिथेयः इङ्ग्लेण्ड्-देशः, किञ्चित्कालात् पूर्वं लीड्स्-नगरस्य हेडिङ्ग्ले-नगरे तृतीयदिने प्रथम -पार्याः क्रीडायां भारतं विरुध्य पञ्चक्रीडकानां हानौ नवत्युत्तरद्विशतधावनाङ्कान् रचितवान्। भारतेन एकसप्तत्युत्तरचतुश्शत-धावनाङ्काः सन्ति रचिताः।

**।। इति वार्ता: ।।**